## रुजार्थानां भाववचनानामज्वरेः । (५४/६१५)

रुजार्थानां धातूनां भाववचनानां भावकर्तृकाणां [1]ज्वरिवर्जितानां कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति । चौरस्य रुजति रोगः । चौरस्या[2]मयत्यामयः । रुजार्थानाम् इति किम् ?

[3]एति जीवन्तमानन्दो नरं वर्षशतादपि ।
[4]जीव पुत्रक मा मैवं [5]तपः साहसमाचर ॥

भाववचनानाम् इति किम् ? नदी कूलानि रुजति (म. भा. १.४६५) । अज्वरेः इति किम् ? चौरं ज्वरयति ज्वरः ।

[१४०] अज्वरिसन्ताप्योरिति वक्तव्यम् । (म. भा. १.४६५)

चौरं सन्तापयति [6]तापः । शेषे इत्येव, चौरं रुजति [7]रोगः ॥

## आशिषि नाथः । (५५/६१६)

'नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु' (धा.पा. ६,७) [8]पठयते[9], तस्याशीःक्रियस्य कर्मणि कारके [10]शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति । सर्पिषो नाथते[11] । मधुनो नाथते । आशिषि इति किम् ? माणवकमुपनाथति [12]अङ्ग पुत्रकाधीष्व ॥

## जासिनिप्रहणनाटक्राथपिषां हिंसायाम् । (५६/७१७)

जासि निप्रहण नाट क्राथ पिष् इत्येतेषां [13]धातूनां हिंसाक्रियाणां कर्मणि कारके षष्ठी विभक्तिर्भवति । 'जसु हिंसायाम्' (धा. पा. १६६९), 'जसु [14]ताडने' (धा.पा. १७१९) इति च चुरादौ पठयते, तस्येदं ग्रहणं, न दैवादिकस्य 'जसु मोक्षणे' (धा. पा. १२१२) [15]इत्यस्य । चौरस्योज्जासयति । वृषलस्योज्जासयति । निप्रहण इति सङ्घातविगृहीतविपर्यस्तस्य ग्रहणम् । चौरस्य निप्रहन्ति । [16]चौरस्य निहन्ति । [17]चौरस्य प्रहन्ति । [18]चौरस्य प्रणिहन्ति[19] । चौरस्योन्नाटयति । वृषलस्योन्नाटयति । चौरस्योत्क्राथयति । [20]वृषलस्य क्राथयति । निपातनाद् वृद्धिः । अयं हि घटादौ पठयते, '[21]श्रथ क्नथ क्रथ क्लथ हिंसार्थाः' (धा. पा. ७९९–८०२) इति । तत्र 'घटादयो मितः' (धा. पा. ७६३–८२२) इति [22]मित्सञ्ज्ञायां 'मितां ह्रस्वः' (६.४.९२/२५६८) इति ह्रस्वत्वं [23]स्यात् । चौरस्य पिनष्टि । वृषलस्य पिनष्टि । [24]हिंसायाम् इति किम् ? धानाः पिनष्टि । शेषे इत्येव, चौरमुज्जासयति । [25]एषाम् इति किम् ? चौरं हिनस्ति । [26]निप्रहण इति किम् ? [27]चौरं विहन्ति ।

---

1. ज्वरवर्जितानां ग, ज्वरतिवर्जितानां ह. 2. रुजति ग. 3. कल्याणी खलु गाथेयं लोकिकी प्रतिभाति मे इति पूर्वार्धः अ. 4. पङ्क्तिरियं नास्ति फ. 5. ततः साहसमाचरेः ह, तपस्तावत् त्वं समाचर ड. 6. सन्तापः ड. फ, सुतापः ब. 7. रोगः नास्ति ग. फ. 8. च इति क. ह. 9. तस्येदं ग्रहणं इत्यधिकम् क. ड. 10. शेषत्वेन विवक्षिते नास्ति ब. क. इ. ह. फ. 11. इति इत्यधिकम् फ. 12. अंगक पुत्रक ह. 13. धातूनां नास्ति फ. 14. ताटने फ. 15. इत्यस्य नास्ति फ. 16-18. चौरस्य नास्ति ड. 19. वा इत्यधिकम् ड. 20. उदाहरणमिदं नास्ति ड. फ. 21. क्रथ हिंसार्थः ड. 22. मित्त्वात् क. इ. ह. 23. यथा इत्यधिकम् इ. 24. हिंसार्थानाम् क. 25. एषाम्–विहन्ति नास्ति फ. ह, एतेषाम् ड. 26. निप्रग्रहणम् ड. 27. हन्ति चोरम् ड.